



# संस्कृतभाषा अभ्यासपुस्तिका

## वेदभूषणतृतीयवर्षम् / प्रथमा तृतीयवर्षम् / कक्षा अष्टमी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥
माता भूमिः पुत्रोऽहं पृथिव्याः ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।
एकः कारणतां गतः ।
सत्सङ्गतिः कथय किं न करोति पुंसाम् ?
वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
वेदैश्च सर्वैरहमेव वेद्यः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ।











महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी (म.प्र.)
(भारतसर्वकारस्य शिक्षामन्त्रालयः)
Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

# प्रथमः पाठः

## महर्षिदधीचेः त्यागः

पुरा सरस्वत्या नद्याः तटे महर्षिदधीचेः आश्रम आसीत्। सोऽहर्निशं जनसेवायां निमज्जति स्म। तस्य प्रभावेण सः आश्रमः स्वर्गेण तुल्यः प्रतिभाति स्म।

तदा वृत्रासुरनामा स्वभावतः क्रूरो दुष्टो दयाहीनः पापाचारी च कश्चिन्महाराक्षसो चासीत्। तस्य पीडाया जना भीता अभवन्। तस्य दुराचारं विलोक्य देवा अपि चिन्ताग्रस्ताः आसन्। वृत्रासुरस्य एतादृशं दुष्कृत्यं सोढुम् अशक्ताः सुराः तस्यासुरस्य वधार्थम् उपायम् अचिन्तयन्। परं मार्गान्तरम् अलभमानाः देवाः ब्रह्मणः समीपं प्राप्नुवन्। ब्रह्मोवाच - वृत्रासुरस्य वधार्थं वज्रसदृशमस्त्रम् अत्यावश्यकम्, तादृशं शस्त्रं दधीचेः एव लब्धुं शक्यते। अतो दधीचिम् उपसृत्य तस्य शरीरस्य अस्थीनि वररूपेण कामयन्ताम् । महर्षेः दधीचेः अस्थिभिः निर्मितेन वज्रास्त्रेण वृत्रासुरः हन्तुं शक्य इति।

ब्रह्मदेवस्य वचनं श्रुत्वा इन्द्रो दधीचेः तपोवनं प्राप्य भक्तिभावपुरस्सरं मुनिवरं सादरं ववन्दे । स्वाश्रमं समागतं सुरेन्द्रं दृष्ट्वा दधीचिः पृष्टवान् - भोः देवेन्द्र ! किमर्थं समागतोऽसि ? इन्द्रदेवः महर्षिं कथयामास– "याचको भूत्वा सम्प्राप्तोऽहम्। भवति लोकोपकारि अमूल्यं वस्तु विद्यते इति श्रुत्वा दधीचिः आश्चर्येण 'किं वा भवेद् मत्सकाशे' ? इति अपृच्छत्।

तदा सुरेन्द्रो जगाद - "हे ! महर्षे ! भवतः अस्थीनि एव लोकोपकारीणि भवितुम् अर्हन्ति, यतः भवदस्थिषु अपूर्वा काचिच्छक्तिः अस्ति । दुष्टस्य वृत्रासुरस्य नाशार्थं तेषाम् आवश्यकता वर्तते । अस्थिभिः वयं वज्रायुधस्य निर्माणं कुर्मः। तेनैव आयुधेन वृत्रासुरस्य वधः कर्तुं शक्येत। तच्छ्रुत्वा महर्षिः सानन्दम् उवाच - अस्य शरीरस्य त्यागः लोककल्याणाय क्रियते ।

अतः स्वीक्रियताम् गात्रमिदम्। तथोक्त्वा योगमाध्मयेन प्राणत्यागं कृत्वा देहं सुरेन्द्रस्य अधीनञ्चकार।

इन्द्रः अस्थिभिः वज्रायुधस्य निर्माणम् अकरोत्। ततः देवदानवयोर्मध्ये प्रचण्डं युद्धं प्रावर्तत। बलवता वृत्रेण सह सुरेन्द्रः युयुधे। वज्रायुधेन वृत्रम् इन्द्रो जघान। वृत्रः अनश्यत्, लोकः सन्तुष्टः। एवं प्रकारेण महर्षिदधीचिः जगदुपकारार्थं स्वदेहस्य त्यागम् अकरोत्। एतादृशापूर्वत्यागेन तपोधनस्य महर्षिदधीचेस्त्यागो जगति प्रसिद्धो बभूव।

# द्वितीयः पाठः

## सम्भाषणम्

### लिट्-लकारः, परस्मैपदी, आत्मनेपदी च

शिष्यः - अभिवादयेऽहं देवदत्तः, आचार्य!

आचार्यः - भोः! आयुष्मान् एधि देवदत्त ३।

शिष्यः - कथमस्ति आचार्य!?

आचार्यः - आम्। कुशली अस्मि। त्वं कथमसि वत्स!

शिष्यः - आम्। अहमपि अस्मि कुशली। आचार्य! अस्ति काचित् जिज्ञासा। कृपया शमयतु मे जिज्ञासाम्।

आचार्यः - एवम्। पृच्छतु तावत् ते जिज्ञासाम्।

शिष्यः - आचार्य! श्रीरामस्य चतुर्दशवर्षाणां वनवासः किमर्थं **बभूव**?

आचार्यः - शृणु वत्स ! श्रीरामस्य तिस्रः मातरः **बभूवुः**। तासु माता कैकेयी राजानं दशरथं वररूपेण रामस्य चतुर्दशवर्षाणां वनवासं तथा स्वपुत्राय भरताय राजसिंहासनं **ययाच**।

शिष्यः - यदा श्रीरामः वनं **जगाम**, तदा तेन सह कौ आस्ताम् ?

आचार्यः - यदा श्रीरामः वनं **जगाम**, तदा तेन सह सीतालक्ष्मणौ आस्ताम्।

शिष्यः - आचार्य ! श्रीरामः रावणं किमर्थं **जघान**?

आचार्यः - रावणः अत्यन्तम् अहङ्कारी सन् सीतामातरम् **अपजहार**। अतः सीतामातरं मोचयितुं रावणस्य अहङ्कारं विनष्टुञ्च श्रीरामः रावणं **मारयामास**।

शिष्यः - आचार्य ! यदा कुम्भकर्णः शेते तदा नैकेन प्रयत्नेनापि नोत्तिष्ठति, किमर्थं तथा?

आचार्यः - कुम्भकर्णस्य तपसा ब्रह्मा **सन्तुतोष** । यदा ब्रह्मा "अभीष्टं किमपि वृणीष्व" इति कुम्भकर्णम् **उवाच**, तदा कुम्भकर्णः त्रुटिवशात् इन्द्रासनस्य स्थाने निद्रासनम् **उच्चारयाञ्चक्रे**। अतः ब्रह्मणो वरात् सः षण्मासान् **सुष्वाप**। वत्स!

शिष्यः - धन्यवादः आचार्य ! अद्य मम वहूनां जिज्ञासानां समाधानम् अभूत् । प्रणमामि ।

आचार्यः - यशस्वी भूयाः।

# तृतीयः पाठः

## समासः

### तत्पुरुषः, कर्मधारयः नञ्, द्विगुः, प्रादिः, मयूरव्यंसकादिः, उपपदसमासश्च

समसनं समासः, अर्थानुकरणं कृत्वा द्वयोः अनेकेषां वा पदानां एकपदी-भवनं समासः। समासः पञ्चधा। तत्रादौ केवलसमासः। स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः। प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः। प्रायेणोत्तरपदार्थप्रधान-स्तत्पुरुषस्तृतीयः। तत्पुरुषभेदः कर्मधारयः, कर्मधारयभेदो द्विगुः। प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः। प्रायेणोभयपदार्थप्रधानो द्वन्द्वः पञ्चमः।

**समर्थः पदविधिः** *(पा.सू. २.१.१)*

**पदविभागः -** समर्थः (प्रथमैकवचनम्), पदविधिः (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः।

**प्राक्कडारात्समासः** *(पा.सू. २.१.३)*

**पदविभागः** -प्राक्(अव्ययम्), कडारात्(पञ्चम्येकवचनम्), समासः(प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते।

**सह सुपा** *(पा.सू. २.१.४)*

**पदविभागः -** सह (अव्ययम्), सुपा (तृतीयैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** सह इति योगो विभज्यते। सुबन्तं समर्थेन सह समस्यते। समासत्वात्प्रातिपदिकत्वेन सुपो लुक्। परार्थाभिधानं वृत्तिः। कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः। वृत्त्यर्थाव-बोधकं वाक्यं विग्रहः। स च लौकिकोऽलौकिकश्चेति द्विधा। तत्र पूर्वं भूत इति विग्रहः लौकिकः। 'पूर्व अम् भूत सु' इत्यलौकिकः। भूतपूर्वः।

## तत्पुरुषसमासः

प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषः। अस्मिन् समासे प्रायः उत्तरपदस्यार्थः प्रधानो भवति यथा - राज्ञः पुरुषः = राजपुरुषः, इह पुरुषशब्दस्यार्थः प्रधानः/मुख्यः इति। राजपुरुषम् आनय। अत्र आनयनक्रियया उत्तरपदार्थस्य पुरुषस्यैव अन्वयः न तु राज्ञः।

तत्पुरुषसमासः प्रामुख्येण द्विविधः। यथा- सामान्यतत्पुरुषः, विशेषतत्पुरुषश्चेति।

## सामान्यतत्पुरुषः -

सामान्यतत्पुरुषसमासे विग्रहवाक्यं सप्तसु विभक्तिषु भवति । अस्य सप्तभेदाः सन्ति।

**तत्पुरुषः** *(पा.सू. २.१.२२)*

**पदविभागः -** तत्पुरुषः (प्रथमैकवचनम्)। एकपदं सूत्रमिदम्।

**वृत्तिः -** अधिकारोऽयम्, प्राग् बहुव्रीहेः।

**द्विगुश्च** *(पा.सू. २.१.२३)*

**पदविभागः -** द्विगुः (प्रथमैकवचनम्), च (अव्ययम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** द्विगुरपि तत्पुरुषसंज्ञकः स्यात्।

### प्रथमातत्पुरुषः

**पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे** *(पा.सू. २.२.१)*

**पदविभागः -** पूर्वापराधरोत्तरम् (प्रथमैकवचनम्),एकदेशिना(तृतीयैकवचनम्), एकाधिकरणे (सप्तम्येकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी। षष्ठीसमासापवादः। पूर्वं कायस्य पूर्वकायः। अपरकायः। एकाधिकरणे किम् ? पूर्वश्छात्राणाम्।

**उदाहरणानि -** पूर्वं कायस्य = पूर्वकायः । अपरं कायस्य = अपकायः ।

**अर्धं नपुंसकम्** *(पा.सू. २.२.२ )*

**पदविभागः -** अर्धम् (प्रथमैकवचनम्), नपुंसकम् (प्रथमैकवचनम्) । द्विपदमिदं सूत्रम्।

**वृत्तिः -** समांशवाच्यर्धशब्दो नित्यं क्लीबे तत्पुरुषसमासः स्यात्। अर्धं पिप्पल्याः अर्धपिप्पली।

**उदाहरणानि -** अर्धं पीप्पल्याः = अर्धपिप्पली । अर्धं मोदकस्य = अर्धमोदकम् ।

### द्वितीयातत्पुरुषः

**द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः** *(पा.सू. २.१.२४)*

**पदविभागः -** द्वितीया (प्रथमैकवचनम्), द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः (तृतीयाबहुवचनम्) । द्विपदं सूत्रमिदम्।

**वृत्तिः -** द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स च तत्पुरुषः।

**उदाहरणानि -** कृष्णं श्रितः = कृष्णश्रितः। दुःखम् अतीतः = दुःखातीतः। कूपं पतितः = कूपपतितः।

## तृतीयातत्पुरुषः

**तृतीया तत्कृतार्थेन गुणवचनेन** *(पा.सू. २.१.३०)*

**पदविभागः -** तृतीया (प्रथमैकवचनम्), तत्कृत (लुप्ततृतीयान्तं पदम्), अर्थेन (तृतीयैकवचनम्), गुणवचनेन (तृतीयैकवचनम्)। चतुष्पदात्मं सूत्रमिदम्।

**वृत्तिः -** तृतीयान्तं तृतीयान्तार्थकृतगुणवचनार्थेन च सह वा प्राग्वत्। शङ्कुलया खण्डः शङ्कुलाखण्ड। तत्कृतेति किम् ? अक्ष्णा काणः।

**उदाहरणानि -** परशुना खण्डः = परशुखण्डः। धान्येन अर्थः = धान्यार्थः।

**कर्तृकरणे कृता बहुलम्** *(पा.सू. २.१.३२)*

**पदविभागः -** कर्तृकरणे (सप्तम्येकवचनान्तम्), कृता (प्रथमैकवचनम्), बहुलम् (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत्। हरिणा त्रातो हरित्रातः। नखैर्भिन्नो नखभिन्नः। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् (परिभाषा)। नखनिर्भिन्नः।

**उदहरणानि -** पाणिनिना रचितः = पाणिनिरचितः, रामेण रक्षितः = रामरक्षितः। अग्निना पक्वम् = अग्निपक्वम्। बाणेन हतः = बाणहतः।

## चतुर्थीतत्पुरुषः

**चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः** *(पा.सू. २.१.३६)*

**पदविभागः -** चतुर्थी (प्रथमैकवचनम्), तदर्थार्थबलिहितसुखरक्षितैः (तृतीयाबहुवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः** -चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत्। यूपाय दारु यूपदारु। (तदर्थेन प्रकृतिविकृतिभाव एवेष्टः)। तेनेह न - रन्धनाय स्थाली। अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् (वार्तिकम्)। द्विजार्थः सूपः। द्विजार्थं पयः। भूतबलिः। गोहितम्। गोसुखम्। गोरक्षितम्।

**उदाहरणानि -** घृताय दधि = घृतदधि। अत्र तदर्थशब्देन चतुर्थ्यन्तं सुबन्तपदं प्रकृतिविकृतिभावे एव प्रवर्त्तते नान्यत्र, तेन हि रन्धनाय स्थाली अत्र समासो न। अर्थशब्देन चतुर्थ्यन्तं पदं नित्यं समस्यते। तथा च अत्र विशेष्यस्य यत् लिङ्गं तत् लिङ्गम् एव समस्तपदस्य भवति। नित्यसमासत्वात् विग्रहवाक्ये अर्थशब्दस्य श्रवणं न भवति। शिष्याय अयम्

= शिष्यार्थः (ग्रन्थः), शिष्याय इयम् = शिष्यार्था (उपनिषद्), शिष्याय इदम् = शिष्यार्थम् (पुस्तकम्)

## पञ्चमीतत्पुरुषः

**पञ्चमी भयेन** *(पा.सू. २.१.३६)*

**पदविभागः -** पञ्चमी (प्रथमैकवचनम्), भयेन (तृतीयैकवचनम्) । द्विपदं सूत्रमिदम्।

**वृत्तिः -** पञ्चम्यन्तं भयशब्देन सुबन्तेन समस्यते इत्यर्थः। भयभीतभीतिभीभिरिति वाच्यम् (वार्तिकम्)। वृकभीतः।

**उदाहरणानि -** चोराद् भयम् = चोरभयम्। व्याघ्राद् भीतिः = व्याघ्रभीतिः । भल्लूकात् भीतः = भल्लूकभीतः। सर्पेभ्यो भीः = सर्पभीः ।

## षष्ठीतत्पुरुषः

**षष्ठी** *(पा.सू. २.२.८)*

**पदविभागः -** षष्ठी (प्रथमैकवचनम्)। एकपदमिदं सूत्रम्।

**वृत्तिः -** षष्ठ्यन्तं सुबन्तेन समस्यते सः तत्पुरुषः। राजपुरुषः

**उदाहरणानि -** राज्ञः पुरुषः = राजपुरुषः। गीतायाः उपदेशः गीतोपदेशः । शरीरस्य धर्मः = शरीरधर्मः

## सप्तमीतत्पुरुषः

**सप्तमी शौण्डैः** *(पा.सू. २.१.४०)*

**पदविभागः -** सप्तमी (प्रथमैवकवचनम्), शौण्डैः (तृतीयैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** सप्तम्यन्तं शौण्डादिभिः प्राग्वत्। अक्षेषु शौण्डः अक्षशौण्ड इत्यादि।

**उदाहरणानि -** अक्षेषु शौण्डः = अक्षशौण्डः। व्याकरणे पटुः = व्याकरणपटुः। व्यवहारे कुशलः = व्यवहारकुशलः।

## मयूरव्यंसकादिः

**मयूरव्यंसकादयश्च** *(पा.सू. २.१.७२)*

**पदविभागः -** मयूरव्यंसकादयः (प्रथमाबहुवचनम्), च (अव्ययम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** एते निपात्यन्ते। मयूरो व्यंसको मयूरव्यंसकः। व्यंसको धूर्तः। उदक्चावाक् च उच्चावचम्। निश्चितं च प्रचितं च निश्चप्रचम्। अन्यत् सूत्रं सूत्रान्तरम्। अन्यो देशः देशान्तरम्।

## नञ्तत्पुरुषः

**नञ्** *(पा.सू. २.२.६)*

**पदविभागः -** नञ् (अव्ययम्)। एकपदं सूत्रमिदम्।

**वृत्तिः -** नञ् सुपा सह समस्यते।

**नलोपो नञः** *(पा.सू. ६.३.७३)*

**पदविभागः -** नलोपः (प्रथमैकवचनम्), नञः (षष्ठ्येकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** नञो नस्य लोपः स्यात् उत्तरपदे।

**उदाहरणानि -** न ब्राह्मणः = अब्राह्मणः। न सुखम् = असुखम्। नञ्तत्पुरुषसमासस्य षडर्थाः भवन्ति, तद्यथा -

साहश्ये यथा - अब्राह्मणः। ब्राह्मणसदृश इत्यर्थः।

अभावे यथा - अभोजनं। भोजनाभाव इत्यर्थः।

अन्यत्वे यथा - अघटः। पटः घटभिन्न इत्यर्थः।

अल्पत्वे यथा - अनुदरी कन्या। अल्पोदरी इत्यर्थः।

अप्राशस्त्ये यथा - अधनम्। अप्रशस्तधनम् इत्यर्थः।

विरोधे यथा - अधर्म्मः परापकारः, परापकारः धर्म्मविरोधी इत्यर्थः।

**तस्मान्नुडचि** *(पा.सू. ६.३.७४)*

**पदविभागः -** तस्मात् (पञ्चम्येकवचनम्), नुट् (प्रथमैकवचनम्), अचि (सप्तम्येकवचनम्)।

**वृत्तिः -** लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अनश्वः।

**उदाहरणानि -** न अश्वः = अनश्वः। न अविद्या = अनविद्या। न अभिज्ञः = अनभिज्ञः।

## कर्मधारयतत्पुरुषः

स च विशेषणपूर्वपदो विशेष्यपूर्वपदो विशेषणोभयपद उपमानपूर्वपद उपमानोत्तरपदः सम्भावनापूर्वपदोऽवधारणापूर्वपदश्चेति भेदात् सप्तविधः। (मध्यमपदलोपं मयूरव्यंसकादिं च स्वीकृत्य कर्मधारयो नवधा।)

**तत्पुरुषः समानाधिकरणः कर्मधारयः** *(पा.सू. १.२.४२)*

**पदविभागः -** तत्पुरुषः (प्रथमैकवचनम्), समानाधिकरणः (प्रथमैकवचनम्), कर्मधारयः (प्रथमैकवचनम्)। त्रिपदात्मकं सूत्रमिदम्।

**वृत्तिः -** समानाधिकरणः तत्पुरुषः कर्मधारयसंज्ञः स्यात्।

**विशेषणं विशेष्येण बहुलम्** *(पा.सू. २.१.५७)*

**पदविभागः -** विशेषणम् (प्रथमैकवचनम्), विशेष्येण (तृतीयैकवचनम्), बहुलम् (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** भेदकं भेद्येन समानाधिकरणेन बहुलं प्राग्वत्। नीलमुत्पलं नीलोत्पलम्। बहुलग्रहणात्क्वचिन्नित्यम् - कृष्णसर्पः। क्वचिन्न - रामो जामदग्न्यः।

**उदाहरणानि -** नीलञ्च इदम् उत्पलम्=नीलोत्पलम्। उत्तमश्च अयम् अध्यापकः = उत्तमाध्यापकः।

**कुगतिप्रादयः** *(पा.सू. २.२.१८)*

**पदविभागः -** कुगतिप्रादयः (प्रथमाबहुवचनम्)। एकपदमिदं सूत्रमिदम्।

**वृत्तिः -** एते समर्थेन नित्यं समस्यन्ते। कुत्सितः पुरुषः कुपुरुषः।

**उदाहरणानि-** कुत्सितः पुरुषः- कुपुरुषः, प्रगतः आचार्यः- प्राचार्यः, विरुद्धः पक्षः- विपक्षः।

## द्विगुतत्पुरुषः

**संख्यापूर्वो द्विगुः** *(पा.सू. २.१.५२)*

**पदविभागः -** संख्यापूर्वः (प्रथमैकवचनम्), द्विगुः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** तद्धितार्थेत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्विगुसंज्ञः स्यात्।

**उदाहरणानि-** अष्टानाम् अध्यायानां समाहारः- अष्टाध्यायी, पञ्चानां गवां समाहारः- पञ्चगवम्।

द्विगुसमासः नपुंसकलिङ्गे एकवचने भवति। परन्तु **'अकारान्तोत्तरपदद्विगुः स्त्रियामिष्टः'**

इति वार्तिकेन अकारान्तोत्तरपदो द्विगुः तु स्त्रीलिङ्गे भवति। तद्यथा - अष्टाध्यायी।

**उपपदमतिङ्** *(पा.सू. २.२.१९)*

**पदविभागः -** उपपदम् (प्रथमैकवचनम्), अतिङ् (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** उपपदं सुबन्तं समर्थेन नित्यं समस्यते। अतिङन्तश्चायं समासः। कुम्भं करोतीति कुम्भकारः।

**उदाहरणानि-** भष्यं करोति इति- भाष्यकारः, कण्ठे तिष्ठति इति- कण्ठस्थः, गङ्गां धरति इति- गङ्गाधरः।

# चतुर्थः पाठः

## वेदाङ्गानि

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।**

**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥**

श्रुत्यर्थज्ञानाय येषां शास्त्राणाम् आवश्यकं वर्तते, तान्येव शास्त्राणि अङ्गानीति उच्यन्ते। इमानि वेदस्य रक्षणे, अर्थज्ञाने च सहायकानि भवन्ति। पाणिनीयशिक्षायां छन्दः पादस्थानीयमस्ति, कल्पः हस्तस्थानीयमस्ति, ज्योतिषं चक्षुस्स्थानीयमस्ति, निरुक्तं श्रोत्रस्थानीयमस्ति, शिक्षा घ्राणस्थानीयमस्ति, व्याकरणं वेदस्य मुखस्थानीयम् चास्ति ।

१. **शिक्षा-** स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा। श्रुतिषु सर्वथा स्वरो मुख्यो भवति, स्वरभेदेन अर्थभेदो जायते। इदं स्वरविज्ञानं शिक्षाधीनं भवति। अतः शिक्षायाः सम्यक् अध्ययनेन, ज्ञानेन च वेदमन्त्राणां शुद्धम् उच्चारणं भवति। तैत्तिरीयोपनिषदः शिक्षावल्ल्यां शिक्षायाः प्रयोजनं निगदितं वर्तते - अथ शिक्षां व्याख्यास्यामः, वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तानः। इह वर्णः अकारादिः, स्वरस्तु उदात्तादिः, मात्रा ह्रस्वादयः, बलमुच्चारणस्थानं ताल्वादिकम्, साम निषादादिः, सन्तानो विकर्षणादिः।

ऋग्वेदस्य पाणिनीयशिक्षा, यजुर्वेदस्य याज्ञवल्क्यशिक्षा, कृष्णयजुर्वेदस्य वासिष्ठीशिक्षा, सामवेदस्य नारदीयशिक्षा, अथर्ववेदस्य माण्डुकीयशिक्षा इति प्रसिद्धाः शिक्षाग्रन्थाः।

२. **कल्पः** – यागकर्मणाम् उपदेशः, यागविधीनां च निर्देशः यत्र अस्ति सः कल्पः। कल्प्यन्ते विधीयन्ते यज्ञयागादिप्रयोगाः यत्र सः कल्पः इति। यथोक्तं विष्णुमित्रेण - कल्पाः वेदविहितानां कर्मणाम् आनुपूर्व्येण कल्पनाशास्त्रम्।

कल्पसूत्राणां श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, शुल्बसूत्रञ्चेति चतुर्धा विभागो वर्तते। श्रौतसूत्रेषु श्रौतयागविधिः निदर्शितः अस्ति। गृह्यसूत्रेषु गृहस्थैरनुष्ठेयानां कर्मणां विधिः निदर्शितः अस्ति। धर्मसूत्रेषु वेदविहितस्य धर्मस्य स्वरूपं दर्शितम् अस्ति। शुल्बसूत्रेषु यज्ञानाम् अनुष्ठानार्थं कुण्डानां मानं, परिमाणं, सूत्रमानं च दर्शितम् अस्ति ।

३. **व्याकरणम्** - व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम्, व्याकरणपदस्य व्युत्पत्त्या साधुशब्दस्य सम्यक् ज्ञानं साधुशब्दव्युत्पादनम्, असाधुशब्देभ्यः साधुशब्दानां दूरीकरणं च व्याकरणेन भवति। वेदादिशास्त्राणां संरक्षणं वेदमन्त्राणां शुद्धोच्चारणम् उदात्तानुदात्तादिस्वरज्ञानं व्याकरणशास्त्रस्य अध्ययनेनैव सम्भवति। अत एव **रक्षोहागमलघ्वसन्देहाः प्रयोजनम्** - रक्षा (वेदानां रक्षा), ऊहः (कल्पना)

आगमः (श्रुतिः), लघुः (लघूपायः), असन्देहः (सन्देहरहितः) इति व्याकरणशास्त्रस्य प्रयोजनं महाभाष्ये उक्तमस्ति।

४. **निरुक्तम्** - निरुक्ते निघण्टौ स्थितानां वैदिकशब्दानां निर्वचनम् अस्ति। आचार्ययास्को निरुक्तस्य प्रणेता वर्तते। यस्मिन् आचार्ययास्कः वैदिकशब्दानां सविस्तरं विवेचनमकरोत्। निघण्टोः पञ्चाध्यायानां विचारः स्वकीये निरुक्तग्रन्थे यास्केन द्वादशाध्यायेषु विहितोऽस्ति। निरुक्तं गद्यशैल्या निबद्धमस्ति किन्तु अन्ये वेदाङ्गग्रन्थाः सूत्रशैल्या निबद्धाः सन्ति।

५. **छन्दः** – वेदमन्त्राणां सम्यग् उच्चारणज्ञानाय तत्रत्यानां वृत्तानां ज्ञानाय च छन्दश्शास्त्रम् अत्यावश्यकम् अस्ति। ऋक्प्रातिशाख्यस्य षोडशपटले, अष्टादशपटले च छन्दसां विस्तृतं विवेचनमस्ति।

वैदिकच्छन्दस्सु अक्षरगणना भवति प्रधाना। उक्तञ्च कात्यायनेन - **'यदक्षरपरिमाणं तच्छन्दः'** इति। वैदिकच्छन्दसाम् अनेके भेदाः सन्ति, तेषु गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती चेति सप्त छन्दांसि प्रधानानि वर्तन्ते। एतेषां छन्दसाम् अक्षरनियमः इत्थं दर्शितः अस्ति - गायत्री (२४ अक्षराणि), उष्णिक् (२८ अक्षराणि), अनुष्टुप् (३२ अक्षराणि), बृहती (३६ अक्षराणि), पङ्क्तिः (४० अक्षराणि), त्रिष्टुप् (४४ अक्षराणि) जगती (४८ अक्षराणि ) च। यदि कस्यापि छन्दसः एकमक्षरं न्यूनं भवति, तदा तत् **'निचृत्'** इत्युच्यते, यदि एकमक्षरम् अधिकं भवति, तदा तत् **'भूरिक्'** इत्यभिधीयते। अनेन प्रकारेण यत्र द्वे अक्षरे न्यूने भवतः, तत्र **'विराट्'** भवति, तथा यत्र द्वे अक्षरे अधिके स्तः, तत्र **'स्वराट्'** भवति ।

६. **ज्योतिषम्** - ज्योतिषशास्त्रस्य ज्ञानेनैव तिथि-पक्ष-मास-ऋतु-अयन-संवत्सर-वार-नक्षत्र-योग-करणादीनां ज्ञानं भवति। शुभकर्मणां यज्ञ-यागादीनां शास्त्रनिर्देशानुरूपं कालज्ञान-पूर्वकम् अनुष्ठानाय ज्योतिषशास्त्रस्य ज्ञानम् अत्यावश्यकं वर्तते।

# पञ्चमः पाठः

# संस्कृतदिवसः

**दिनेशः** - भोः सुहृद् ! अद्याहं कल्ये जयतु संस्कृतम्, जयतु भारतम् "संस्कृतभाषा अस्माकं भाषा" इत्यादीनि उद्घोषवाक्यानि अश्रृण्वम्। किम् इदम् ? के एते सोल्लासमुद्घोषवाणीमुच्चारयन्तः परिक्रामन्ति?

**जया** - आम् ! अहम् अपि प्रातः जयतु संस्कृतम्, जयतु भारतम् इत्यादीः उद्घोषवाणीः श्रुतवती।

**विवेकः** - अथ किं न जानासि त्वम् ? श्रावणमासस्य पूर्णिमायां तिथौ आविश्वं संस्कृतदिनम् आचर्यते। अस्मिन्नेव दिने रक्षाबन्धनोत्सवोऽपि अनुष्ठीयते।

**मालिनी** - अस्मिन् दिने संस्कृतोत्सवः कथम् ?

**राजेशः** - अस्मिन् दिने वेदाध्ययनस्य आरम्भात् प्राक् शिष्याणाम् उपनयनसंस्कारः भवति। एतस्मिन् दिने पुरातनं यज्ञोपवीतं परिवर्त्यते। प्राचीनकाले पौषपौर्णिमायाः श्रावणपौर्णिमापर्यन्तं पुनश्च श्रावणपौर्णिमायाः पौषपौर्णिमापर्यन्तम् अध्ययनं भवति स्म।

**प्रदीपः** - अस्मिन्नेव दिवसे संस्कृतदिवसः परिपालयितव्यः इत्यस्मिन् विषये सर्वकारपक्षतः कोऽपि निर्देशोऽस्ति वा ?

**ऋतम्भरा** - आम् ! अवश्यम् अस्ति। १९६९ (नवषष्ठ्याधिकनवशतम्) तमे वर्षे भारतसर्वकारस्य शिक्षामन्त्रालयेन केन्द्रराज्यस्तरयोः संस्कृतदिवसस्य आचरणाय निर्दिष्टम् अस्ति।

**जया** - अस्मिन् दिने किं किम् अनुष्ठीयते ?

**विवेकः** - अस्मिन् दिने प्रातः बालाः सम्भूय उद्घोषं विकुर्वाणाः वीथीषु परिभ्रमन्ति, संस्कृतवाक्यैः अभिवादयमानाः परस्परम् आलपन्ति च। गुरुकुलेषु पाठशालासु विश्वविद्यालयेषु च श्लोकपाठस्पर्धा, अन्त्याक्षरी, वेदपाठस्पर्धा, रसप्रश्नाः, कथाकथनम्, गीतस्पर्धा, इत्यादयः स्पर्धाः प्रचाल्यन्ते। अन्ते संस्कृतविदुषां सम्मानकार्यक्रमाः भवन्ति। अमी कार्यक्रमाः सप्ताहं यावत् प्रचलन्ति।

**दिनेशः** - संस्कृतसप्ताहानुष्ठानस्य किं वा उद्देश्यम् ? को लाभोऽनेनानुष्ठानेन ?

**ऋतम्भरा** - मित्र! श्रूयताम्- संस्कृतम् अस्माकं भारतीयानां गौरवम् अभिज्ञानं चास्ति। सुसम्बद्धा संस्कृतभाषा **वसुधैव कुटुम्बकम्, सर्वे भवन्तु सुखिनः, धर्मं चर, सत्यं वद, यतो धर्मः ततो जयः, सत्यमेव जयते** इत्यादीः बह्वीः नीतीः अस्मान् उपदिशति। अस्मादेव कारणात् संस्कृतभाषा रक्षणीया ज्ञेया च।

**मालिनी** - अयं संस्कृतदिवसः केवलं भारते एव परिपाल्यते वा ?

**राजेशः** - नैव। अयं विश्वसंस्कृतदिवसः भारतसर्वकारेण यूनेस्कोसंस्थया च सम्भूय आयोज्यते।

**जया** - धन्यवादः मित्राणि ! अद्य भवन्तः संस्कृतभाषाविषये अस्माकं भ्रान्तीः उपेक्षाश्च दुरीकुर्वन्। अस्तु अद्यारभ्य वयमपि संस्कृतभाषायाः प्रचारं प्रसारञ्च करिष्यामः।

**ऋतम्भरा** - अस्तु समीचीनम्। तर्हि वयं सर्वेऽपि अद्य संस्कृतदिवसे भागग्रहणं कुर्मः। जयतु संस्कृतम्, जयतु भारतम्।

**सर्वे मिलित्वा** - अवश्यम्। जयतु संस्कृतम्, जयतु भारतम्। संस्कृतभाषा अस्माकं भाषा।

# षष्ठः पाठः

## कृदन्तपरिचयः

कृत् अन्ते वर्तते यस्य सः कृदन्तः। कृत्-प्रत्ययविधाने तात्कालिकक्रियावान् गम्यते यथा - पठन्। 'कृत्तद्धितसमासाश्च' इति विशेषसूत्रेण अस्य प्रातिपदिकसंज्ञा विधीयते। कृदन्तपदानि नामपदानि विशेषणानि अव्ययानि वा भवन्ति।

कृत्-प्रत्ययाः कर्त्रर्थे विधीयन्ते चेत् कर्तरि कृदन्ताः, कर्मार्थे विधीयमानेषु कर्मणिकृदन्ताः, भावार्थे च भावेकृदन्ताः इति कथ्यन्ते।

**शतृ (अत्) प्रत्ययः**

'शतृ' प्रत्ययः परस्मैपदिधातुभ्यः कर्त्रर्थे विधीयते। यः धातुवाच्यक्रियावान् सः शत्रन्तपदस्यार्थः। यथा - पठन् - पठनरूपक्रियावान्।

| | | | |
|---|---|---|---|
| **उदाहरणम् -** | पुँल्लिङ्गः | - | पठन् बालः उत्तीर्णो भवति। |
| | स्त्रीलिङ्गः | - | खादन्ती बालिका विद्यालयं गच्छति। |
| | नपुंसकलिङ्गः | - | गच्छद्वाहनं कम्पते। |

**शतृप्रत्ययान्तरूपाणि**

| धातुः | पुंल्लिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| कथ् + शतृ | कथयन् | कथयन्ती | कथयत् |
| गै + शतृ | गायन् | गायन्ती | गायत् |
| दृश् (पश्य) + शतृ | पश्यन् | पश्यन्ती | पश्यत् |
| दा + शतृ | ददत् | ददती | ददत् |
| नृत् + शतृ | नृत्यन् | नृत्यन्ती | नृत्यत् |
| पठ् + शतृ | पठन् | पठन्ती | पठत् |

**'शतृप्रत्ययान्तवाक्यानि'**

१. बालकः चित्रं पश्यन् खादति।

२. त्वं क्रीडन्तीं छात्रां पश्य।

**शानच् (आन) प्रत्ययः**

वर्तमानार्थे आत्मनेपदिधातुभ्यः 'शानच्' प्रत्ययः प्रयुज्यते । अयमपि त्रिषु लिङ्गेषु विधीयते । अस्य प्रत्ययस्य अन्ते आन/मान इति अवशिष्यते।

**उदाहरणम् -** पुंलिङ्गः - वन्दमानः छात्रः यशस्वी भवति।

स्त्रीलिङ्गः - आसीना छात्रा पाठं पठति।

नपुंसकलिङ्गः - शोभमानं गृहम् अग्निः दहति।

| **धातुः + प्रत्ययः** | **पुंलिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|
| वृ + शानच् | वर्धमानः | वर्धमाना | वर्धमानम् |
| वन्द् + शानच् | वन्दमानः | वन्दमाना | वन्दमानम् |
| शुभ् + शानच् | शोभमानः | शोभमाना | शोभमानम् |
| एध् + शानच् | एधमानः | एधमाना | एधमानम् |
| विद् + शानच् | विद्यमानः | विद्यमाना | विद्यमानम् |

**शानच्-प्रत्ययान्त-वाक्यानि**

१. उपहारं लभमाना बालिका मोदते।

२. मोदमानः छात्रः आगच्छति।

३. सा याचमाना अस्ति।

**तव्यत्-तव्य-अनीयर्-प्रत्ययाः**

सकर्मकधातोः कर्मार्थे अकर्मकधातोः भावार्थे च तव्यादयः प्रत्ययाः प्रयुज्यन्ते। एतदन्तानि पदानि अपि प्रातिपदिकानि एव भवन्ति। ततः सुप्-प्रत्ययाः विधीयन्ते। अतः लिङ्गत्रये रूपाणि भवन्ति।

**यथा -** पुंलिङ्गम् - बालेन वेदः पठनीयः। गन्तव्यः मार्गः परिशीलयितव्यः।

स्त्रीलिङ्गम् - अस्माभिः भगवद्गीता अध्ययनीया। अध्येतृभिः प्रणन्तव्या सरस्वती माता।

नपुंसकलिङ्गम् - छात्रेण संस्कृतं वदनीयम्। प्रारब्धं कार्यं न त्यक्तव्यम् ।

| **धातुः + प्रत्ययः** | **पुँल्लिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|
| पठ् + तव्य | पठितव्यः | पठितव्या | पठितव्यम् |
| पठ + अनीय | पठनीयः | पठनीया | पठनीयम् |
| गम् | गन्तव्यः | गन्तव्या | गन्तव्यम् |
| | गमनीयः | गमनीया | गमनीयम् |

| | | | |
|---|---|---|---|
| भू | भवितव्यः | भवितव्या | भवितव्यम् |
| | भवनीयः | भवनीया | भवनीयम् |

**कर्मणिप्रयोगः**
मया चिन्तनीयम्।
बालकेन पठितव्यम्।

**भावेप्रयोगः**
शिशुना हसनीयम्।
धावकेन धावनीयम्।

**(तव्यत्-प्रत्ययान्तम् अनीयर्-प्रत्ययान्तं च विशेषणं भवति । अतः तत् विशेषण- विशेष्ययोः सामान्यं नियमम् अनुसृत्य लिङ्गं विभक्तिं वचनं च अनुसरति।)**

**यत्-प्रत्ययः**

**अचो यत्** *(३.१.९७)* - अजन्ताद् धातोः यत् प्रत्ययः भवति।

**पोरदुपधात्** *(३.१.९८)* - पवर्गान्तात् अदुपधात् धातोः यत् प्रत्ययः भवति । यत् प्रत्ययः कर्मवाच्ये भाववाच्ये च भवति।**यथा** -

1. **नपुंसकलिङ्गे**- छात्रेण जलं पेयम्। मया दानं देयम्।
2. **स्त्रीलिङ्गे**- त्वया विद्या अध्येया। गुरुणा शिक्षा देया।
3. **पुंलिङ्गे**- मया वेदः अध्येयः। अस्माभिः शत्रुः जेयः।

**त्रिषु लिङ्गेषु यत्-प्रत्ययान्तरूपाणि -**

| धातुः + प्रत्ययः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| **दा + यत्** | देयः | देया | देयम् |
| **क्री + यत्** | क्रेयः | क्रेया | क्रेयम् |
| **श्रु + यत्** | श्रव्यः | श्रव्या | श्रव्यम् |

**क्तक्तवतू निष्ठा** *(१.१.२६)* - क्त-क्तवतू प्रत्ययौ निष्ठासंज्ञौ भवतः।

**क्त-प्रत्ययः** - क्तप्रत्यायान्तः शब्दः क्तान्तः भवति। क्तप्रत्ययः भूतकाले कर्मार्थे भावार्थे च धातोः विधीयते। अतः सुबन्त इव रूपाणि भवन्ति। अस्य प्रत्ययस्य रूपाणि त्रिषु लिङ्गेषु अधः प्रदत्तानि। यथा -

| धातुः | + | प्रत्ययः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|
| **कृ** | + | क्त | कृतः | कृता | कृतम् |
| **दा** | + | क्त | दत्तः | दत्ता | दत्तम् |
| **लभ्** | + | क्त | लब्धः | लब्धा | लब्धम् |

उदाहरणानि -

1. **नपुंसकलिङ्गे-** तेन पुस्तकं पठितम्। तेन ग्रामः गतः।
2. **स्त्रीलिङ्गे-** त्वया परीक्षा उत्तीर्णा। बालकेन वार्ता श्रुता।
3. **पुंलिङ्गे-** छात्रेण गुरुः सेवितः। तेन ग्रामः गतः।

## क्तवतु-प्रत्ययः (तवत्)

क्तवतु-प्रत्ययान्तः शब्दः क्तवत्वन्तः। अयं प्रत्ययः धातोः जायते। एषः प्रत्ययः सर्वेभ्यः धातुभ्यः कर्त्रर्थे भूतकाले विधीयते। अस्य प्रत्ययस्य त्रिषु लिङ्गेषु रूपाणि इत्थं भवन्ति। यथा -

| धातुः | + | प्रत्ययः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|---|
| **भू** | + | क्तवतु | भूतवान् | भूतवती | भूतवत् |
| **गम्** | + | क्तवतु | गतवान् | गतवती | गतवत् |
| **वच्** | + | क्तवतु | उक्तवान् | उक्तवती | उक्तवत् |

उदाहरणानि –

1. **पुंलिङ्गे-** राजा गृहं गतवान्। छात्रः पुस्तकं पठितवान्।
2. **स्त्रीलिङ्गे-** बालिका संस्कृतेन उक्तवती। रमा भोजनं कृतवती।
3. **नपुंसकलिङ्गे-** पत्रं भूमौ पतितवत्। यानं गतवत्।

# सप्तमः पाठः

## सुभाषितम्

**श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन।**
**विभाति कायः करुणापराणां परोपकारैर्न तु चन्दनेन॥**

**अन्वयः -** श्रोत्रं श्रुतेन एव (विभाति) कुण्डलेन न, पाणिः दानेन (विभाति) कङ्कणेन न करुणापराणां कायः परोपकारैः विभाति, न तु चन्दनेन ।

**तात्पर्यम् -** शास्त्रश्रवणेन कर्णस्य शोभा भवति न तु कुण्डलधारणेन। दानेन हस्तयोः शोभा भवति न तु कङ्कणधारणेन। तथैव करुणापराणां जनानां शोभा परोपकारेण भवति न तु चन्दनेन।

**ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो,**
**ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः।**
**अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता,**
**सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्॥**

**अन्वयः -** ऐश्वर्यस्य सुजनता, शौर्यस्य वाक्संयमः ज्ञानस्य उपशमः, श्रुतस्य विनयः वित्तस्य पात्रे व्ययः, तपसः, अक्रोधः प्रभवितुः क्षमा धर्मस्य निर्व्याजता च विभूषणं सर्वेषाम् अपि सर्वकारणम् इदं शीलं परं भूषणम्।

**तात्पर्यम् -** ऐश्वर्यस्य आभूषणं सज्जनता अस्ति। शौर्यस्य भूषणं वाक्संयमः। ज्ञानिनः गर्वं न कुर्वन्ति। शान्तिः एव तेषाम् आभूषणम् अस्ति। ये शास्त्रं जानन्ति ते विनम्राः भवन्ति। धनिनः सत्पात्रे व्ययं कुर्वन्ति। तपस्विनः क्रोधं न कुर्वन्ति। ये बलशालिनः सन्ति तेषां विभूषणं क्षमा भवति। धर्मस्य विभूषणं निष्कपटव्यवहारः भवति। सर्वेषां भूषणानां मूलं शीलम् अस्ति। अतः शीलं भूषणेषु श्रेष्ठं परिगण्यते।

**विपदि धैर्यमथाभ्युदये क्षमा**
**सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ**
**प्रकृतिसिद्धमिदं हि महात्मनाम्॥**

**अन्वयः -** विपदि धैर्यम् अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि अभिरुचिः, श्रुतौ च व्यसनम्। महात्मनाम् इदं हि प्रकृतिसिद्धम्।

**तात्पर्यम् -** महात्मानः स्वभावेन एव धैर्यशीलाः, उन्नतिकाले क्षमाशीलाः च भवन्ति। सभायां वाक्चातुर्यम्, युद्धकाले पराक्रमः, यशःप्राप्तौ रुचिः, शास्त्रश्रवणे आसक्तिः च तेषां स्वभावः एव अस्ति।

**आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया।**

**पादं सब्रह्मचारिभ्यः पादः कालेन पच्यते॥**

**तात्पर्यम् -** विद्यायाः अंशचतुष्टये शिष्यः आचार्यात् एकांशं स्वीकरोति। एकांशं स्वस्य बुद्धिशक्त्या सम्पादयति। सहपाठिनां सहवासेन तृतीयांशम् अवगच्छति। अन्तिमभागांशं कालक्रमेण जानाति।

**अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।**

**उत्तमा मानमिच्छन्ति मानो हि महतां धनम्॥**

**अन्वयः -** अधमाः धनम् इच्छन्ति, मध्यमाः धनं मानं च इच्छन्ति, उत्तमा मानम् इच्छन्ति। मानो हि महतां धनम्।

**तात्पर्यम् -** ये धनम् इच्छन्ति ते अधमाः। ये धनं मानं चोभयम् इच्छन्ति ते मध्यमाः। ये मानम् इच्छन्ति ते उत्तमाः यतः महतां मान एव धनं भवति। महाराजानां धनम् अभिमानः इति भावः।

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**

**चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम्॥**

**अन्वयः -** अभिवादनशीलस्य नित्यं वृद्धोपसेविनः, तस्य चत्वारि वर्द्धन्ते आयुर्विद्यायशोबलम्।

**तात्पर्यम् -** यः अभिवादनं करोति तथा वृद्धानां नित्यं सेवां करोति सः आयुः, विद्याम्, यशः, बलं च प्राप्नोति।

**दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्।**

**सत्यपूतां वदेत् वाचं मनःपूतं समाचरेत्॥**

**अन्वयः -** दृष्टिपूतं पादं न्यसेत् वस्त्रपूतं जलं पिबेत् सत्यपूतां वाचं वदेत् मनःपूतम् समाचरेत्।

**तात्पर्यम् -** दृष्ट्वा पादं स्थापयेत्, सर्वदा वस्त्रेण शोधयित्वा जलं पिबेत्, सत्ययुक्तां वाणीं वदेत्, पवित्रम् आचरणं कुर्यात्।

# अष्टमः पाठः

## चतुर्दशविद्यास्थानानि

शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्योतिषम्, कल्पः चेति षड् वेदाङ्गानि, ऋक्, साम, यजुः, आथर्वण इति चत्वारो वेदाः, मीमांसाशास्त्रम्, न्यायविस्तरशब्देन ज्ञायमाना न्यायविद्या, दण्डनीतिः, वार्त्ता च अष्टादश-पुराणानि, धर्मशास्त्रञ्च चतुर्दशविद्यासु अन्तर्भवन्ति। एतासां चतुर्दशविद्यानां ज्ञानं द्वापरयुगे उज्जयिन्यां महर्षिसान्दीपनिः श्रीकृष्णं बलरामं सुदामाञ्च चतुष्षष्टौ दिनेषु एव दत्तवान्।

इह हि वाङ्मयमुभयथा शास्त्रं काव्यञ्च। शास्त्रं द्विधा अपौरुषेयं पौरुषेयं च। अपौरुषेयं श्रुतिः। श्रुतिः पुनः द्विविधा मन्त्राः ब्राह्मणं च। विवृत्तक्रियातन्त्रा मन्त्राः। मन्त्राणां स्तुतिनिन्दा-व्याख्यानविनियोगग्रन्थो ब्राह्मणम्।

तत्रार्थव्यवस्थितपादाः ऋचः। ताः सगीतयः सामानि । अच्छन्दांस्यगीतानि यजूंषि। एवमेव चत्वारो वेदाः भवन्ति यथा- ऋग्वेदः, यजुर्वेदः, सामवेद, अथर्ववेदश्च। क्रमशः एतेषां वेदानामुपवेदाः भवन्ति-आयुर्वेदः, धनुर्वेदः, गन्धर्ववेदः, स्थापत्यवेदश्च। वेदार्थपरिज्ञानाय षड् वेदाङ्गानि भवन्ति यथा- शिक्षा, कल्पो, व्याकरणम्, निरुक्तम्, छन्दोविचितिः, ज्योतिषञ्च ।

तत्र वर्णानां स्थान-करण-प्रयत्नादिभिः निष्पत्तिनिर्णयिनी शिक्षा। नानाशाखाधीनानां मन्त्राणां विनियोजकं सूत्रं कल्पः। सा च यजुर्विद्या। शब्दानामन्वाख्यानं व्याकरणम्। निर्वचनं निरुक्तम्। छन्दसां प्रतिपादयित्री छन्दोविचितिः। ग्रहगणितं ज्योतिषम्।

पौरुषेयं तु पुराणम्, न्यायविद्या, मीमांसा, स्मृतितन्त्रम् इति चत्वारि शास्त्राणि।

# नवमः पाठः

# द्वन्द्वाव्ययीभावबहुव्रीहयः

**चार्थे द्वन्द्वः** *(पा.सू. २.२.२९)*

**पदविभागः -** चार्थे (सप्तम्येकवचनम्), द्वन्द्वः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते, स द्वन्द्वः। समुच्चय-अन्वाचय-इतरेतरयोग-समाहारश्चार्थाः। परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः। अन्यतरस्यानुषङ्गिकत्वे-ऽन्वाचयः। मिलितानामन्वय इतरेतरयोगः। समूहः समाहारः।

**उभयपदार्थप्रधानो द्वन्द्वसमासः।**

## इतरेतरयोगद्वन्द्वः

द्वन्द्वसमासे समस्तपदे स्थितानाम् अर्थानां यदा पृथक्तया बोधो भवति तदा इतरेतरयोगद्वन्द्वसमास इत्युच्यते। अत्र समस्तपदं द्विवचने बहुवचने वा भवति। तथैव उत्तरपदस्य यल्लिङ्गं तदेव समस्तपदस्यापि भवति।

**उदाहरणानि**

रामश्च कृष्णश्च रामकृष्णौ, रामकृष्णौ वेदपाठशालां गच्छतः।

गुरुश्च शिष्यश्च गुरुशिष्यौ, गुरुशिष्यौ वेदपारायणं कुरुतः।

पत्रञ्च पुष्पञ्च फलञ्च पत्रपुष्पफलानि, पत्रपुष्पफलानि देवाय अर्पयामि।

## समाहारद्वन्द्वः

समस्तपदे विद्यमानानां पदानां समूहार्थः यदा विवक्षितो भवति तदा समाहारद्वन्द्वो भवति, इह समस्तपदं नपुंसकलिङ्गे, एकवचने च भवति।

**उदाहरणम् -** संज्ञा च परिभाषा च संज्ञापरिभाषम्, अहं संज्ञापरिभाषं पाठयामि।

पाणी च पादौ च पाणिपादम्, पुत्रः पित्रोः पाणिपादं प्रक्षालयति।

हरिश्च हरश्च गुरुश्च एषां समाहारः हरिहरगुरु, हरिहरगुरु शिष्याय मङ्गलं प्रददाति।

घटश्च पटश्च अनयोः समाहारः घटपटम्, घटपटमस्ति।

## अव्ययीभावसमासः

**अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथाऽनुपूर्व्य-यौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु** *(पा.सू. २.१.६)*

**पदविभागः** - अव्ययम् (प्रथमैकवचनम्), विभक्तिसमीप.......वचनेषु (सप्तमीबहुवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - अव्ययम् इति योगो विभज्यते। अव्ययं समर्थेन सह समस्यते, सोऽव्ययीभावः। विभक्त्यादिषु अर्थेषु यद् अव्ययं वर्तते तत् समर्थेन सुबन्तेन सह समस्यते। अव्ययीभावश्च समासो भवति।

**पूर्वपदार्थप्रधानोऽव्ययीभावः।**

(अव्ययीभावसमासः त्रिविधः यथा- अव्ययपूर्वपदः, अव्ययोत्तरपदः, अव्ययपदरहितश्च)

### अव्ययपूर्वपदः

| | | | | | |
|---|---|---|---|---|---|
| १. | विभक्त्यर्थे | - | हरौ इति | = | अधिहरि |
| २. | समीपार्थे | - | कृष्णस्य समीपम् | = | उपकृष्णम् |
| ३. | समृद्ध्यर्थे | - | मद्राणां समृद्धिः | = | सुमद्रम् |
| ४. | व्यृद्ध्यर्थे | - | यवनानां व्यृद्धिः | = | दुर्यवनम् (विगता ऋद्धिः) |
| ५. | अर्थाभावार्थे | - | मक्षिकाणाम् अभावः | = | निर्मक्षिकम् |
| ६. | अत्ययार्थे | - | हिमस्य अत्ययः | = | अतिहिमम् (अत्ययः ध्वंसः) |
| ७. | असम्प्रत्यर्थे | - | निद्रा सम्प्रति न युज्यते इति | = | अतिनिद्रम् |
| ८. | शब्दप्रादुर्भावार्थे | - | हरिशब्दस्य प्रकाशः | = | इतिहरि |
| ९. | पश्चादर्थे | - | विष्णोः पश्चात् | = | अनुविष्णु |
| १०. | यथार्थश्चतुर्धा | - | | | |
| | (क) योग्यार्थे | - | रूपस्य योग्यम् | = | अनुरूपम् |
| | (ख) वीप्सार्थे | - | अर्थम् अर्थं प्रति | = | प्रत्यर्थम् |
| | (ग) पदार्थानतिवृत्त्यर्थे | - | शक्तिम् अनतिक्रम्य | = | यथाशक्ति |
| | (घ) सादृश्यार्थे | - | हरेः सादृश्यम् | = | सहरि |
| ११. | आनुपूर्व्यार्थे | - | ज्येष्ठस्य आनुपूर्व्येण | = | अनुज्येष्ठम् |
| १२. | यौगपद्यार्थे | - | चक्रेण युगपत् | = | सचक्रम् |

| | | | | |
|---|---|---|---|---|
| १३. | सादृश्यार्थे | - सदृशः सख्या | = | ससखि |
| १४. | सम्पत्यर्थे | - क्षत्राणां सम्पत्तिः | = | सक्षत्रम् |
| १५. | साकल्यार्थे | - तृणमप्यपरित्यज्य | = | सतृणम् (अत्ति) |
| १६. | अन्तार्थे | - अग्निग्रन्थपर्यन्तम् अधीते | = | साग्नि |
| १७. | अवधारणार्थे | - यावन्ति नामानि (तावन्तः अच्युतप्रणामः) | = | यावन्नामम् |
| १८. | मर्यादार्थे | - आ मुक्तेः (संसारः) | = | आमुक्ति (मुक्तिपर्यन्तं संसारः) |
| १९. | अभिविध्यार्थे | - आ हिमालयात् | = | आहिमालयम्(भारतदेशः) |
| २०. | आभिमुख्यार्थे | - अग्निं प्रति | = | प्रत्यग्नि |
| | | अग्निम् अभि | = | अभ्यग्नि |

### अव्ययोत्तरपदः अव्ययीभावसमासः

| | | | | |
|---|---|---|---|---|
| १. | मात्रार्थे | - शाकस्य लेशः | = | शाकप्रति |

### अव्ययपदरहितः अव्ययीभावसमासः

| | | | |
|---|---|---|---|
| १. | तिष्ठन्ति गावः यस्मिन् काले | = | तिष्ठद्गु |
| २. | गङ्गायाः पारे | = | पारेगङ्गम् |
| ३. | द्वयोः यमुनयोः समाहारः | = | द्वियमुनम् |
| ४. | त्रयो मुनयो वंश्याः | = | त्रिमुनि (व्याकरणम्) |

अव्ययीभावस्य अव्ययत्वात् त्रिषु लिङ्गेषु समानं रूपं भवति।

## बहुव्रीहिसमासः

**अनेकमन्यपदार्थे** *(पा.सू. २.२.२४)*

**पदविभागः** - अनेकम् (प्रथमैकवचनम्), अन्यपदार्थे (सप्तम्येकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः। प्रथमार्थम् एकं वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिः भवति। प्राप्तम् उदकं यं ग्रामं स प्राप्तोदको ग्रामः। लिङ्गत्रयेऽपि बहुव्रीहिः सम्भवति ।

### सामान्यबहुव्रीहिः (समानाधिकरणबहुव्रीहिः)

बहुव्रीहिः सामान्यः विशेषश्चेति द्विधा इति पूर्वम् उक्तम्। समानाधिकरणबहुव्रीहिः एव अत्र सामान्यशब्देन व्यवहृतः। सामान्यः षोढा इत्युक्तम् ।

१. ऊढो रथो येन सः - ऊढरथः

२. आरुढं यानं येन सः - आरुढयानः

३. कृतं भोजनं येन सः - कृतभोजनः

४. प्रविष्टा शाला येन सः - प्रविष्टशालः

५. अधीतं काव्यं यया सा - अधीतकाव्या

६. धृतानि पुष्पाणि यया सा - धृतपुष्पा

## व्यधिकरणबहुव्रीहिः

असमानविभक्त्यन्तयोः समासो व्यधिकरणबहुव्रीहिः उच्यते। विभिन्न-विभक्त्यन्तयोः समासो व्यधिकरणबहुव्रीहिः इति कथ्यते।

१. गदा पाणौ यस्य सः - गदापाणिः

२. भाले चन्द्रः यस्य सः - भालचन्द्रः

३. चन्द्रः मौलौ यस्य सः - चन्द्रमौलिः

## सङ्ख्योत्तरपदः

**संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये** *(पा.सू. २.२.२५)*

**पदविभागः** -संख्यया (तृतीयैकवचनान्तम्), अव्यय-आसन्न-अदूर-अधिक-संख्याः (प्रथमाबहुवचनम्), संख्येये (सप्तम्येकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः** - संख्येयार्थया संख्यया अव्ययादयः समस्यन्ते स बहुव्रीहिः। दशानां समीपे ये सन्ति ते उपदशाः। नव एकादश वेत्यर्थः। अव्यय-आसन्न-अदूर-अधिकशब्दाः सङ्ख्येयार्थकेन सङ्ख्याशब्देन समस्यन्ते। सङ्ख्योत्तरपदसमासे सर्वे बहुवचनान्ताः भवन्ति।

१. दशानां समीपे ये सन्ति ते - उपदशाः

२. पञ्चाशतः समीपे ये सन्ति ते - उपपञ्चाशाः

३. अशीतेः समीपे ये सन्ति ते - उपाशीताः

४. शतस्य समीपे ये सन्ति ते - उपशताः

५. पञ्चविंशतेः आसन्नाः - आसन्नपञ्चविंशाः

६. चत्वारिंशतः अदूराः - अदूरश्चत्वारिंशाः

७. सहस्रात् अधिकाः - अधिकसहस्राः

## सङ्ख्योभयपदः

सङ्ख्येयार्थकं सङ्ख्येयपदं सङ्ख्येयार्थकेन सङ्ख्यापदेन समस्यते -

१. द्वौ वा त्रयो वा - द्वित्राः

३. पञ्च वा षड् वा - पञ्चषाः

## सहपूर्वपदः

सह इत्येतत् तृतीयान्तेन समस्यते ।

१. पुत्रेण सह वर्तते इति - सपुत्रः/सहपुत्रः।

२. कर्मणा सह वर्तते इति - सकर्मकः

## व्यतिहारलक्षणः

व्यतिहारलक्षणस्य सर्वाणि उदाहरणाणि अव्ययानि भवन्ति।

१. केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् - केशाकेशि

२. दण्डैः दण्डैः प्रहृत्य इदं युद्धं प्रवृत्तम् - दण्डादण्डि

## दिगन्तराललक्षणः

**दिङ्नामान्यन्तराले** *(पा.सू. २.२.२६)*

**पदविभागः -** दिङ्-नामानि (प्रथमाबहुवचनम्), अन्तराले (सप्तम्येकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** दिशो नामान्यन्तराले वाच्ये प्राग्वत्। दक्षिणस्याश्च पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा। नामग्रहणाद्यौगिकानां न। ऐन्द्याश्च कौबेर्याश्चान्तरालं दिक्।

१. दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालम् - दक्षिणपूर्वा

२. पूर्वस्याः उत्तरस्याः च दिशोर्यदन्तरालम् - पूर्वोत्तरा

३. उत्तरस्याः पश्चिमस्या दिशोर्यदन्तरालम् - उत्तरपश्चिमा

## नञ्बहुव्रीहिः

**नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपश्च** *(वार्तिकम्)*

सप्तम्यन्तसहितस्य उपमानसहितस्य च पूर्वपदस्य पदान्तरेण समासः पूर्वपदस्य उत्तरपदलोपश्च भवति।

१. अविद्यमानः पुत्रः यस्य सः - अपुत्रः

२. अविद्यमानम् अपत्यं यस्य सः - अनपत्यः

३. अविद्यमाना पुत्री यस्य सः - अपुत्रीकः

## प्रादिबहुव्रीहिः

प्रादिभ्यः परं धातुजप्रकृतिकप्रथमान्तम् अन्येन प्रथमान्तेन समस्यते। परस्य धातुजस्य लोपश्च भवति।

१. निर्गता दया यस्मात् सः - निर्दयः

२. दुर्गता मेधा यस्य सः - दुर्मेधः

३. निर्गता करुणा यस्मात् सः - निष्करुणः

## उपमानपूर्वपदः

सप्तम्यन्तसहितम् उपमानसहितञ्च समस्तपदं पदान्तरेण समस्यते। अस्मिन् समासे विग्रहावस्थायां पूर्वपदं समस्तम् एव भवति। तस्मिन् पदे यत् उत्तरपदं तस्य लोपश्च भवति।

१. पुण्डरीके इव अक्षिणी यस्य सः - पुण्डरीकाक्षः

२. चन्द्रस्य मुखम् इव मुखं यस्याः सा - चन्द्रमुखी

**अथ अलुक्समासो लुक्समासश्च**

यस्मिन् समासे विभक्तेः लोपो भवति सः लुक्समास इत्युच्यते। यत्र च विभक्तेः लोपो न जायते स अलुक्समास इत्युच्यते। तद्यथा -

लुक्समासो यथा - तनुरेव लता = तनुलता। रामस्य नाम = रामनाम।

अलुक्समासः - जीमूतस्य इव = जीमूतस्येव। वने चरति इति = वनेचरः।

# दशमः पाठः

## श्रीरामवनगमनम्

काव्यं श्रव्यं दृश्यम् इति द्विधा विभक्तम्। यत् काव्यं पठितुं, द्रष्टुञ्च शक्यते तादृशं काव्यम् दृश्यकाव्यम्, यस्य साधारणतया नाटकम् इति प्रसिद्धं नाम। पाठ्यभागोऽयं महाकविभासविरचितस्य प्रतिमानाटकस्य प्रथमाङ्कात् सङ्गृहीतः। नाटकेऽस्मिन् सप्त अङ्काः वर्तन्ते। अमुष्मिन् १५७ श्लोकाः सन्ति।

पात्रपरिचयः - काञ्चुकीयः, रामः, सीता, लक्ष्मणः

(प्रविश्य)

काञ्चुकीयः - परित्रायतां परित्रायतां कुमारः।

रामः - आर्य ! कः परित्रातव्यः ?

काञ्चुकीयः - महाराजः!

रामः - महाराजः इति। आर्य ! ननु वक्तव्यम्। एकशरीरसंक्षिप्ता पृथिवी रक्षितव्येति। अथ कुत उत्पन्नोऽयं दोषः ?

काञ्चुकीयः - तत्र भवत्याः कैकेय्याः।

रामः - किमम्बायाः, तेन हि उदर्केण गुणेनात्र भवितव्यम्।

काञ्चुकीयः - कथमिव ?

रामः - श्रूयताम्

**यस्याः शक्रसमो भर्ता मया पुत्रवती च या।**
**फले कस्मिन् स्पृहा तस्या येनाकार्यं करिष्यति॥२॥**

काञ्चुकीयः - कुमार! अलमुपहतासु, स्त्रीबुद्धिषु, स्वमार्जवमुपनिक्षेप्तुम्। तस्या एव खलु वचनात् भवदभिषेको निवृत्तः।

रामः - आर्य ! गुणाः खल्वत्र।

काञ्चुकीयः - कथमिव ?

रामः - श्रूयताम,

**वनगमननिवृत्तिः पार्थिवस्यैव तावन्मम पितृपरवत्ता बालभावः स एव।**
**नवनृपतिविमर्शे नास्ति शङ्का प्रजानामथ च न परिभोगैर्वञ्चिता भ्रातरो मे॥३॥**

काञ्चुकीयः - अथ च तयाऽनाहूतोपसृतया भरतोऽभिषिच्यतां राज्य इत्युक्तम् अत्राप्यलोभः।

रामः - आर्य ! भवान् खल्वस्मत्पक्षपातादेव नार्थमवेक्षते। कुतः ?

**शुल्के विपणितं राज्यं पुत्रार्थे यदि याच्यते।**

**तस्या लोभोऽत्र नास्माकं भ्रातृराज्यापहारिणाम् ॥४॥**

काञ्चुकीयः - अथ -------

रामः - अतः परं न मातुः परिवादं श्रोतुमिच्छामि। महाराजस्य वृत्तान्तस्तावदभि-धीयताम्।

काञ्चुकीयः - ततस्तदानीम्,

**शोकादवचनाद् राज्ञा हस्तेनैव विसर्जितः ।**

**किमप्यभिमतं मन्ये मोहं च नृपतिर्गतः ॥५॥**

रामः - कथं मोहमुपगतः।

(नेपथ्ये)

कथं कथं मोहमुपगत इति।

यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयाम्॥

रामः - (आकर्ण्य पुरतो विलोक्य)

**अक्षोभ्यः क्षोभितः केन लक्ष्मणो धैर्यसागर ।**

**येन रुष्टेन पश्यामि शताकीर्णमिवाग्रतः ॥ ६ ॥**

(ततः प्रविशति धनुर्बाणपाणिर्लक्ष्मणः)

लक्ष्मणः - (सक्रोधम्) कथं कथं मोहमुपगत इति।

**यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयां**

**स्वजननिभृतः सर्वोप्येवं मृदुः परिभूयते।**

**अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो**

**युवतिरहितं लोकं कर्तुं यतश्छलिता वयम् ॥७॥**

सीता - आर्यपुत्र! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्। अपूर्वः खल्वस्यायासः।

रामः - सुमित्रामातः ! किमिदम् ?

लक्ष्मणः - कथं कथं किमिदं नाम।

**क्रमप्राप्ये हृते राज्ये भुवि शोच्यासने नृपे ।**

**इदानीमपि सन्देहः किं क्षमा निर्मनस्विता॥८॥**

रामः - सुमित्रामातः ! अस्मद्राज्यभ्रंशो भवत उद्योगं जनयति।

आः, अपण्डितः खलु भवान्।

**भरतो वा भवेद् राजा वयं वा ननु तत् समम्।**

**यदि तेऽस्ति धनुश्श्लाघा स राजा परिपाल्यताम् ॥९॥**

लक्ष्मणः - न शक्नोमि रोषं धारयितुम्। भवतु भवतु गच्छामस्तावत्।

(प्रस्थितः)

रामः - **त्रैलोक्यं दग्धुकामेव ललाटपुटसंस्थिता।**

**भृकुटिर्लक्ष्मणस्यैषा नियतीव व्यवस्थिता ॥१०॥**

लक्ष्मणः - आर्य ! अयमस्मि।

रामः - भवतः स्थैर्यमुत्पादयता मयैवमभिहितम्।

उच्यतामिदानीम्।

**ताते धनुर्न मयि सत्यमवेक्ष्यमाणे मुञ्चानि मातरि शरं स्वधनं हरन्त्याम्।**

**दोषेषु बाह्यमनुजं भरतं हनानि किं रोषणाय रुचिरं त्रिषु पातकेषु॥११॥**

लक्ष्मणः - (सवाष्पम्) हा धिक् ! अस्मान् अविज्ञायोपालभसे।

**यत्कृते महति क्लेशे राज्ये मे न मनोरथः ।**

**वर्षाणि किल वस्तव्यं चतुर्दश वने त्वया ॥१२॥**

रामः - अत्र मोहमुपगतस्तत्र भवान्। हन्त ! निवेदितमप्रभुत्वम्। मैथिलि !

**मङ्गलार्थेऽनया दत्तान् वल्कलांस्तावदानय।**

**करोम्यन्यैर्नृपैर्धर्मं नैवाप्तं नोपपादितम्॥१३॥**

सीता - गृह्णात्वार्यपुत्रः।

रामः - मैथिलि ! किं व्यवसितम् ?

सीता - ननु सहधर्मचारिणी खल्वहम्।

रामः - मयैकाकिना किल गन्तव्यम्।

सीता - अतो नु खल्वनुगच्छामि।

रामः - वने खलु वस्तव्यम्।

सीता - तत् खलु मे प्रसादः।

रामः - श्वश्रूश्वशुरशुश्रूषापि च ते निर्वर्तयितव्या।

सीता - एनामुद्दिश्य देवतानां प्रणामः क्रियते।

रामः - लक्ष्मण ! वार्यतामियम्।

लक्ष्मणः - आर्य ! नोत्सहे श्लाघनीये काले वारयितुम् अत्र भवतीम्।

# एकादशः पाठः

## अस्माकं राष्ट्रस्य गौरवम्

अस्माकं देशस्य संस्कृतिः प्राचीनतमा विश्ववारा सनातनी च आस्ते। सहस्रशः वर्षेभ्यः पूर्वं यदा इतर देशेषु अक्षराणां ज्ञानमपि नासीत्, तदा अस्माकं देशे चतुर्णां वेदानाम्, शिक्षाकल्पादीनां वेदाङ्गानाम्, पुराणानाम्, उपपुराणानाम्, विविधानां शास्त्रग्रन्थानाम् अध्ययनम् अध्यापनं च प्रचलितम् आसीत्। तदा विविधविद्यानां अध्ययनध्यापनं च कर्तुम्, सनातनसंस्कृतेः संरक्षणार्थं च तक्षशिला-नालन्दा-वाराणसी-मिथिला-तल्हरा-शारदापीठ-बल्लभी-काञ्ची-पुरी-धारा-अवन्तिका-पुष्पगिरि-गुण्टूरु-विक्रमशिला-सोमपुर-बनवासि-कल्याण-श्रीपत्तन-पैठणादिस्थानेषु आधुनिकविश्वविद्यालयसदृशानि नैकानि गुरुकुलानि आसन्। तेषु गुरुकुलेषु सर्वेषां जनानां सममेव अध्ययनं भवति स्म, तेषु अन्यतमः भगवान् श्रीकृष्णः महर्षेः सान्दीपनेः गुरोः सन्निधौ चतुष्षष्टेः(६४) कलानाम् अध्ययनम् अकरोत्। प्राचीनकालिकीं गुरुकुलपरम्पराम् अनुसृत्य वेदानां सस्वरपरम्पराम्, वेदाङ्गानि च संरक्षितुं भगवतो निःश्वसितस्य वेदस्य सर्वतोमुखं प्रसारं च कर्तुम् उज्जयिन्यां स्थितं "महर्षि-सान्दीपनि-राष्ट्रिय-वेद-विद्या-प्रतिष्ठानम्" वेदानाम्, पारम्परिकविद्यानां च अध्ययन-अध्यापनादिशैक्षिकं कार्यम्, वेदसम्मेलनादिमुखेन वेदप्रचारादिकं च सम्पादयति।

देशेऽस्मिन् बहूनि तीर्थस्थलानि सन्ति। काश्यां श्रीविश्वनाथः, अयोध्यायां श्रीरामः, उज्जयिन्यां श्रीमहाकालः, वैद्यनाथे श्रीवैद्यनाथेश्वरः, श्रीरामेश्वरे ईश्वरः, तिरुपतौ श्रीवेङ्कटेश्वरः, काञ्च्यां कामाक्षी, मथुरायां श्रीकृष्णः, द्वारकायां श्रीकृष्णः, पुर्यां श्रीजगन्नाथः, पुष्करे ब्रह्मा, शृङ्गगिरौ श्रीशारदादेवी च भारतभुवं पावयन्ति, भक्तानाम् अभीष्टं पूरयन्ति च।

भारतदेशस्य प्राकृतिकी शोभा अनुपमा अस्ति। असंख्यैः उच्चैः शिखरैः शोभितः हिमालयः भारतदेशस्य उत्तरसीमानं रक्षति। हिमालयपरिसरे हरिद्वारम्, ऋषिकेशः, बदरीनाथ-केदारनाथ-यमुनोत्री-गङ्गोत्री च इत्यादीनि रम्याणि तीर्थस्थलानि सन्ति। एतेषु तीर्थस्थानेषु पवित्राणि नद्यः वहन्ति, गङ्गा काशीनगरे, यमुना मथुरायाम्, सरयूः अयोध्यायाम्, तुङ्गभद्रा शृङ्गगिरौ, नासिकप्रदेशे गोदावरी च वहति।

वसिष्ठ-विश्वामित्रप्रभृतयः मन्त्रद्रष्टारः ऋषयः, याज्ञवल्क्यादयः ब्रह्मज्ञाः, जनकादयः राजर्षयः, मैत्रेयी, गार्गी, लोपमुद्रा इत्याद्याः च विदुष्यः, व्यास-बाल्मीकि-कालिदासादयः कवयः पाणिनि-

कात्यायन-पतञ्जल्यादयो वैयाकरणाश्च, कणाद-बोधायन-आर्यभट्ट-ब्रह्मगुप्त-वराहमिहिर-भास्कराचार्य-महावीराचार्य-नागार्जुनदयो विज्ञानविशारदाः।

श्रीशङ्कराचार्यः केरले, श्रीरामानुजाचार्यः तमिलनाडुराज्ये, श्रीमध्वाचार्यः कर्णाटके च जन्म लब्ध्वा देशे सर्वत्र अद्वैत-विशिष्टाद्वैत-द्वैतदर्शनस्य च मार्गोपदेशं कृत्वा जनान् उदधरन्। गुजरातप्रदेशे लब्धजन्मा वेदव्रती महर्षिः दयानन्दः च राष्ट्रगौरवं विश्वे अवर्धयन्। वीरमहिलाः झांसी राज्ञी लक्ष्मीबाई-माता, कित्तूरु-चेन्नम्मा, अहल्याबाई-होल्कर प्रभृतयः देशरक्षणम् अकुर्वन्। महान्तः योद्धारः सेनानायकाः महाराष्ट्रे वीरशिवाजी, राजस्थाने महाराणाप्रतापः इत्यादयः परमदेशभक्ताः भारतमातुः रक्षाम् कृतवन्तः। भारतमातुः सुपुत्राः नेताजी सुभाषचन्द्रबोसः, राष्ट्रियस्वयंसेवकसङ्घस्य संस्थापकः डॉ. केशवबलिरामहेडगेवारमहोदयः, अहिंसापथप्रदर्शकः महात्मगान्धिमहोदयः एवं गुजरातप्रदेशीयः भारतरत्नं श्रीसरदारवल्लभभाईपटेलः राजाधिराजक्रमेण शतशः विभिन्नं भारतभूप्रदेशम् एकीकृत्य देशे भावैक्यं देशगौरवं च समवर्धयत्।

पाटलिपुत्रे अर्थशास्त्रकृत् विष्णुगुप्तः चाणक्यः, आर्यभट्टः, भामहः च; गुजरातराज्ये नागार्जुनः, भरद्वाजः, कणादश्च, मध्यप्रदेशे वराहमिहिरः इत्यादयः वैज्ञानिकाः विज्ञानस्य महत्त्वं प्रसारितवन्तः। काश्मीरेषु आनन्दवर्धनः, अभिनवगुप्तः, क्षेमेन्द्रः, कल्हणः च, एवमन्ये च कविशेखराः, उत्तरप्रदेशे वेदव्यासः, अवन्तिकायाम् उज्जयिन्यां कालिदासः, मध्यप्रदेशे बाणभट्टः, राजशेखरः, धारानगर्यां भोजराजः इत्यादयः महाकवयः अपि भारतमातुः सुपुत्राः संस्कृतसरस्वतीसमाराधका एतत् अस्माकं सौभाग्यं यत् वयम् अपि भारतमातुः पुत्राः पुत्र्यश्च स्मः, वेदं संस्कृतं पठामः, अभ्यासं कुर्मश्च।

# द्वादशः पाठः

# नमस्त्रिमूर्तये तुभ्यम्

संस्कृतसाहित्यजगति कविकुलगुरुः इत्युपधिना प्रसिद्धः महाकविः कालिदासः। प्रस्तुतः पाठोऽयं महाकविकालिदासप्रणीतस्य कुमारसम्भवस्य द्वितीयसर्गात् केचन श्लोकाः सङ्गृहीताः। कुमारसम्भवमहाकाव्ये सप्तदश (१७) सर्गाः सन्ति।

**तस्मिन् विप्रकृताः काले तारकेण दिवौकसः।**
**तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः॥ १॥**

**अन्वयः -** तस्मिन् काले तारकेण विप्रकृताः दिवौकसः तुरासाहं पुरोधाय स्वायंभुवं धाम ययुः।

**भावार्थः -** पार्वतीसुश्रूषाकाले तारकेण वज्राङ्गतनयेनासुरेण उपद्रुताः सन्तः दिवौकसः देवाः तुरासाहम् इन्द्रं पुरोधाय अग्रेकृत्य स्वायंभुवं ब्रह्मलोकं जग्मुः।

**तेषामाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम्।**
**सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव॥ २॥**

**अन्वयः-** परिम्लानमुखश्रियां तेषां ब्रह्मा सुप्तपद्मानां सरसां प्रातः दीधितिमान् इव आविरभूत्।

**भावार्थः -** तारकविप्रकृतत्वात् परिम्लानमुखश्रियां नष्टवक्त्रकान्तीनां तेषां देवानां विरिञ्चिः सुप्तपद्मानां संकुचितारविन्दानां तोयाशयानां प्रभाते रविराविर्भवतीव ।

**अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम्।**
**वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे॥ ३॥**

**अन्वयः -** अथ ते सर्वे सर्वतोमुखं वागीशं सर्वस्य धातारं प्रणिपत्य अर्थ्याभिः वाग्भिः उपतस्थिरे।

**भावार्थः -** आविर्भावानन्तरं ते सर्वे देवाः सर्वतोमुखं चतुर्मुखं विद्यानामीशं सर्वस्य जगतः स्रष्टारं ब्रह्माणं नमस्कृत्य अर्थयुक्ताभिः गीर्भिः उपतस्थिरे स्तुतिमारभत।

**नमस्त्रिमूर्त्तये तुभ्यं प्राक्सृष्टेः केवलात्मने।**
**गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे॥ ४॥**

**अन्वयः -** हे भगवन् ! सृष्टेः प्राक् केवलात्मने पश्चाद् गुणत्रयविभागाय भेदम् उपेयुषे त्रिमूर्तये तुभ्यं नमः।

**भावार्थः** - हे भगवन्! सृष्टेः प्राक् केवलात्मने अभिन्नरूपाय पश्चात् सृष्टिप्रवृत्तिकाले सत्त्वरजस्तमोलक्षणस्य विभागाय भेदं प्राप्तवते त्रिमूर्तये ब्रह्मविष्णुरुद्ररूपिणे तुभ्यं नमः ।

**तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्।**
**प्रलयस्थितिसर्गाणामेकः कारणतां गतः॥६॥**

**अन्वयः** - एकः त्वं तिसृभिः अवस्थाभिः महिमानम् उदीरयन् प्रलयस्थितिसर्गाणां कारणतां गतः।

**भावार्थः** - एकः सृष्टेः प्राक् केवलः त्वमेकमेव तिसृभिः अवस्थाभिः त्रैगुण्यमयीभिः हरिहरब्रह्मरूपाभिः दशभिः माहात्म्यं कथयन् प्रलयस्य स्थितेः उत्पत्तेः संहाररक्षासृष्टीनां कारणतां निदानत्वं प्राप्तः।

**स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य ते।**
**यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ॥८॥**

**अन्वयः** - स्वकालपरिमाणेन व्यस्तरात्रिन्दिवसस्य ते यौ तु स्वप्नावबोधौ तौ एव भूतानां प्रलयोदयौ स्तः।

**भावार्थः** - स्वकालपरिमाणेन निजसमयमानेन व्यक्तं विभागीकृतं, रात्रिन्दिवम् दिवानिशं येन तस्य, ते तव यौ तु स्वप्नावबोधौ तावेव भूतानां प्रलयोदयौ विनाशाविभावौ स्तः।

**उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्।**
**कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम्॥१०॥**

**अन्वयः** - हे भगवन् ! यासां गिराम् उद्घातः प्रणवः यासां त्रिभिः न्यायैरुदीरणम्, यासां कर्म यज्ञः। फलं स्वर्गः तासां गिरां प्रभवः असि।

**भावार्थः** - हे भगवन् ! यासां गिरां वाचाम् उद्घातः उत्पत्तिस्थानं प्रणवः ओङ्कारात्मकः उद्गीथाख्यः, यासाञ्च त्रिभिः न्यायैः व्यवस्थाभिः तारमन्द्रमध्यैः उदात्तानुदात्तस्वरितैर्वा, यासां कर्म यज्ञः ज्योतिष्टोमादिरिति, फलं स्वर्गः, तासां श्रुतीनां गिरां वेदानां प्रभवः कारणम् असि।

# त्रयोदशः पाठः

## प्रयोगपरिचयः, लट्-लङ्-लोटः

प्रयोगः त्रिविधः कर्तरि, कर्मणि, भावे चेति। सकर्मकधातूनां कर्तरि कर्मणि च प्रयोगो भवति। अकर्मकधातूनां कर्तरि, भावे च प्रयोगो भवति।

**लः कर्मणि च भावे चाकर्मकेभ्यः (३.४.६०)**

**वृत्तिः** - लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च।

### १. कर्तरि प्रयोगः

**नियमाः-** अस्मिन् कर्तृपदार्थस्य प्राधान्यं भवति। कर्तृपदं प्रथमाविभक्त्यन्तं भवति। कर्मपदं द्वितीयाविभक्त्यन्तं भवति। क्रियापदं कर्तृपदस्य पुरुषं वचनं च अनुसरति।

यथा -

| कर्तृपदम् | कर्मपदम् | क्रियापदम् |
|---|---|---|
| बालकः | पाठं | पठति |
| माता | जलम् | आनयति |
| राणाप्रतापः | प्रतिज्ञां | करोति |

### २. कर्मणि प्रयोगः

**नियमाः-** अत्र कर्मपदार्थस्य प्राधान्यम्। कर्मणि प्रयोगे कर्तृपदं तृतीयाविभक्त्यन्तं भवति। कर्मपदं प्रथमाविभक्त्यन्तं भवति। क्रियापदं कर्मपदस्य लिङ्गं वचनं च अनुसरति। आत्मनेपदान्तमेव क्रियापदं भवति। मूलधातुना सह 'य' इति योज्यते।

यस्याः क्रियायाः कर्माकाङ्क्षा भवति तादृशक्रियावाचकः धातुः सकर्मकः। अयं प्रयोगः सकर्मकधातूनामेव सम्भवति। यथा -

| कर्तृपदम् | कर्मपदम् | क्रियापदम् |
|---|---|---|
| बालकेन | पाठः | पठ्यते (पठ्+य+ते) |
| बालकेन | पाठौ | पठ्येते |

### ३. भावेप्रयोगः

**नियमाः-** अत्र भावस्यैव (धात्वर्थस्यैव) प्राधान्यं भवति। अस्मिन् कर्तृपदं तृतीयाविभक्त्यन्तं भवति। कर्मपदं न सम्भवति। क्रियापदं सर्वदा आत्मनेपदिनि प्रथमपुरुषे एकवचने भवति। अयं प्रयोगः अकर्मकधातूनामेव सम्भवति।

**यथा - छात्रेण धाव्यते**

| प्रयोगः | कर्तृपदम् | कर्मपदम् | क्रियापदम् | प्राधान्यम् |
|---|---|---|---|---|
| **कर्तरि** | प्रथमान्तम् | द्वितीयान्तम् | कर्तृपदानुसारम् | कर्तृपदार्थस्य |
| **कर्मणि** | तृतीयान्तम् | प्रथमान्तम् | कर्मपदानुसारम्(आत्मनेपदी) | कर्मपदार्थस्य |
| **भावे** | तृतीयान्तम् | न भवति | आत्मनेपदिनि, प्रथमपुरुषैकवचने | धात्वर्थस्य भावस्य |

| कर्तरिप्रयोगः | | |
|---|---|---|
| **कर्तृपदम्** | **कर्मपदम्** | **क्रियापदम्** |
| **रामः** | प्रश्नं | लिखति |
| **सीता** | वीणां | वादयति |
| **सः** | मां | पश्यति |
| **सा** | गीतां | वाचयति |
| **त्वं** | महादेवं | नमसि |
| **अहं** | पाठं | पठामि |

| कर्मणिप्रयोगः | | |
|---|---|---|
| **कर्तृपदम्** | **कर्मपदम्** | **क्रियापदम्** |
| रामेण | प्रश्नः | लिख्यते |
| सीतया | वीणा | वाद्यते |
| तेन | अहं | दृश्ये |
| तया | गीता | उच्यते |
| त्वया | महादेवः | नम्यते |
| मया | पाठः | पठ्यते |

| कर्तरि प्रयोगः | भावे प्रयोगः |
|---|---|
| **सूर्यः प्रकाशते ।** | सूर्येण प्रकाश्यते। |
| **शिशुः स्वपिति ।** | शिशुना सुप्यते। |
| **मयूरः नृत्यति ।** | मयूरेण नृत्यते । |
| **अहं अस्मि ।** | मया भूयते । |
| **बालिकाः हसन्ति ।** | बालिकाभिः हस्यते । |

# चतुर्दशः पाठः

## मन्त्रद्रष्टारः ऋषयः

भारतीयपरम्परायाम् ये श्रुतिग्रन्थानां (वेदमन्त्राणां) यथावत् दर्शनं कृतम् ते ऋषयः इति कथ्यन्ते। यथा-

**ऋषयो मन्त्रद्रष्टारः।**

ऋषति प्राप्नोति सर्वान् मन्त्रान् ज्ञानेन पश्यति संसारपारं वा इत्यस्मिन् अर्थे ऋष् धातोः 'इगुपधात् कित्' इति उणादिसूत्रेण इन्-प्रत्यये ऋषिशब्दो निष्पद्यते। ऋषिभिः प्रकाशितग्रन्थाः आर्षग्रन्थेन ज्ञायन्ते।

### वशिष्ठः -

वशिष्ठो अयोध्यायाः राज्ञः दशरथस्य कुलगुरुः, ब्रह्मणः मानसपुत्रः, वैदिककालस्य अन्यतमः ऋषिः च आसीत्। तस्य पत्न्याः नाम अरुन्धती आसीत्। त्रिकालज्ञः, तत्त्वदर्शी, क्षमाशीलः, तपोनिष्ठः, ब्रह्मनिष्ठः, ज्ञानवान् चैष बभूव। त्रेतायुगस्यान्ते स ब्रह्मलोकं प्रतिजगाम।

### भरद्वाजः -

महर्षिभरद्वाजः ऋग्वेदस्य षष्ठमण्डलस्य द्रष्टा बभूव। मण्डलेऽस्मिन् भरद्वाजरचिताः सप्तशतोत्तरपञ्चषष्टिः (७६५) मन्त्राः सन्ति। अथर्ववेदे अपि महर्षिभरद्वाजस्य त्रयोविंशतिः (२३) मन्त्राः प्राप्यन्ते। भरद्वाजस्य पितुः नाम बृहस्पतिः तथा मातुः नाम ममता आसीत्। भारद्वाजस्मृतिं भारद्वाजसंहितां, यन्त्र-सर्वस्वञ्च (विमानशास्त्रम्) महर्षिभरद्वाजो रचयामास।

### विश्वामित्रः -

वैदिककालस्य लब्धख्यातिर्विश्वामित्रः सप्तर्षिष्वन्यतमः। ऋषिरयं जन्मना क्षत्रियो बभूव। कुशिकवंशे गाधिराज इति सुप्रसिद्धो महाराज आसीत्, तस्य पुत्रः कौशिकः। स एव विश्वामित्र इति नाम्ना प्रसिद्धः।

### कश्यपः (कण्वः) -

महर्षिकण्वः ऋग्वेदस्य अष्टममण्डलस्य द्रष्टा बभूव। तस्य आश्रमः मालिनीनद्याः तटे आसीत्। 'सोमयाग' इत्यस्य कर्त्तृरूपेण लब्धख्यातिरयं महर्षिकण्वः। आश्रमस्य समीपमेव हस्तिनापुरस्य राज्ञः दुष्यन्तस्य भार्यायाः शकुन्तलायाः एवं तस्याः पुत्रस्य भरतस्य लालनादिकं कृतम्। महर्षिकण्वस्य अपरं नाम 'कश्यपः' इति अभिज्ञानशाकुन्तले लभ्यते।

**अत्रिः -**

ऋग्वेदस्य पञ्चममण्डलस्य द्रष्टा महर्षिः अत्रिः ब्रह्मणः पुत्रः, सोमस्य पिता, कर्दमप्रजापतिदेवहूत्योः पुत्र्याः अनुसूयायाः पतिः च आसीत्। अनुसूया भगवतीं सीतां पतिव्रताधर्ममुपदिष्टवती।

**गौतमः -**

महर्षिः गौतमः सप्तर्षिष्वेकोऽन्यतमः, मन्त्राद्रष्टाश्च आसीत्। ऋग्वेदे एतन्नाम्नि नैकानि सूक्तानि लभ्यन्ते। तस्य पत्नी अहल्या बभूव। अयं न्यायसूत्राणां रचयिता आसीत्। अस्यापरं नाम अक्षपादः इति।

**जमदग्निः -**

जमदग्निः भृगुवंशस्य ऋचीकस्य पुत्र आसीत्। अस्य माता आसीत् गाधिराजस्य पुत्री सत्यवती। अस्य पत्नी प्रसेनजितः पुत्री रेणुका। एषोऽपि सप्तर्षिषु परिगण्यते। एतस्य पुत्रः परशुरामो बभूव।

# महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

## माध्यमेन सञ्चालिता प्रस्ताविता च राष्ट्रीयादर्शवेदविद्यालयः




**महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)**

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in